18-12-2020

साहित्यम् शास्त्री

छन्दनिर्णयं कुरुत →

"या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,
या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
या ब्रह्माच्युतशङ्करप्रभृतिभिर्देवैः सदा वन्दिता,
सा मां पातु सरस्वती भगवती निःशेष जाड्यापहा ॥"
(विश्लेषणम्)

प्रस्तुतस्य श्लोकस्य प्रत्येके चरणे ऊनविंशत्याक्षराः सन्ति। इदं पद्यमतिधृत्याः जात्याः अस्ति। यगणादिनिर्णयः पद्यस्य प्रत्येके चरणे एवंप्रकारेण अस्ति →

या कुन्देन्दुतुषारहारधवला या शुभ्रवस्त्रावृता,
S S S । । S । S । । । S S S । S S । S
मगण सगण जगण सगण तगण तगण गुरु

या वीणावरदण्डमण्डितकरा या श्वेतपद्मासना ।
S S S । । S । S । । । S S S । S S । S
मगण सगण जगण सगण तगण तगण गुरु

मगणादिक्रमेण ज्ञायते यदत्र अतिधृतिजात्या शार्दूलविक्रीडितवृत्तम् । वृत्तस्य (छन्दस्य) लक्षणम् →

"सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।"

यस्य छन्दस्य प्रतिचरणं एकेन गुरुणा सहिताः मगण, सगण, जगण, सगण, तगणद्वयाश्च स्युः, द्वादशभिः, सप्तभिः अक्षरैः यतिर्भवेत्, तद् वृत्तं 'शार्दूलविक्रीडितम्' उच्यते।

18-12-2020

डॉ० निर्मलकुमार झा, (स० प्राचार्यः)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

"**पारिभाषिकशब्दाः**।" उपशास्त्री / अनिवार्यप्रथमपत्रम्। व्याकरणम्।

1. उपदेशः → आद्योच्चारणम् मुनित्रयस्य। यथा → धातुपाठः, सूत्रम्, गणपाठः, उणादिपाठः, लिङ्गानुशासनम्, आगमः, प्रत्ययः, आदेशः।

धातुपाठः – भ्वादयः धातवः।

गणपाठः – शकन्ध्वादिषु पररूपवाच्यम्।

सूत्रपाठः – संज्ञादिसूत्रपाठः – सुप्तिङन्तं पदम्।

स्वच्छाया – स्व+छाया – स्वत् छाया – दीर्घ-तुगागम

आगमः – मित्रवत् अन्यवर्णस्य आगमनम्। यथा → स्वच्छम्, स्वच्छे चकारस्यागमः। वि+छेदः = विच्छेदः।

आदेशः – शत्रुवत्। यदि+अपि = यद्यपि। अत्र इकारस्थाने 'य्' आदेशः।

2. अच् → प्रत्याहारः अस्ति। 'अच्' प्रत्याहारे समस्ताः स्वरवर्णाः आयान्ति।

3. हल् → 'हल्' अपि प्रत्याहारः। समस्ताः = व्यञ्जनवर्णाः।

4. इत् → उपदेशे अन्त्यं 'हल्' "अनुनासिकस्वरश्च" इत्संज्ञकः भवति। यथा → अक् इत्यस्मिन् 'क्' इत्संज्ञकः अस्ति।

5. लोपः → प्रसक्तस्य अदर्शनं लोपसंज्ञं स्यात्। अथवा विद्यमानस्य श्रवणाभावः 'लोप' संज्ञकः भवति

6. सवर्णम् → "तुल्यास्यप्रयत्नं सवर्णम्।"

येषां वर्णानां कण्ठादिगतोच्चारणस्थानं तथा च आभ्यन्तरयत्नं, द्वावपि समानौ भवतः, ते वर्णाः परस्परं सवर्णं भवन्ति।

ऋ एवं लृ अपि। यथा → अ एवम् आ। इ एवम् ई। उ एवम् ऊ।

7. अनुनासिक → मुखनासिकावचनोनुनासिकः।

8. अवसानम् → विरामोऽवसानम्।

वर्णानामभावोऽवसानसंज्ञः स्यात्। यथा → रामर्।

अत्र अन्त्य रकारात् वर्णाभाव अतएव अन्त्यरकारपश्चात् उच्चारणाभाव तस्मात् अन्त्य रकारस्य अवसानसंज्ञा।

18-12-2020

डॉ० निर्मल कुमार झा, स० प्राचार्य।
राधा-उमाकान्त सं० महावि० सुरखसेना, पूर्णियाँ

हितोपदेश:

उपशास्त्री। प्रथमवर्ष:   अनिवार्यप्रथमपत्रम् ।

संस्कृत सामान्यम् ।

" आपदामापतन्तीनां हितोऽप्यायाति हेतुताम् ।
मातृजङ्घा हि वत्सस्य स्तम्भी भवति बन्धने ॥"

अन्वय: → आपदाम् आपतन्तीनां हित: अपि हेतुताम् आयाति । हि (यतो हि) वत्सस्य बन्धने मातृजङ्घा स्तम्भी भवति ।

व्याकरणम् → आपदाम् -(विपत्तिनाम्) आ + √पद् + क्विप् + टाप् ।

आपतन्तीनां - आ + √पत् + ल्युट् (आपतनम्) तस्य ।

आपदामापतन्तीनाम् - आपदाम् + आपतन्तीनाम् । आपदग्रस्तस्य । विपदाग्रस्तस्य ।

हितोऽप्यायाति → हित: + अपि + आयाति

√धा → हि + क्त - हित: । (हितकर:) आयाति - आगच्छति ।

हेतुताम् → √हि + तुन् = हेतु:, हेतु + तल् + टाप् → हेतुता, कारणत्वम्

मातृजङ्घा → मातु: पाद: । हि - निश्चयेन (अव्ययम्)

वत्सस्य → बालस्य, √वद् + स: । वत्स शब्दस्य षष्ठी एकवचने रूपम् ।

स्तम्भी → स्तम्भ् + अच् (अवरोधक:) ।

भवति → √भू लट्, (शप्) + तिप् (घटयति, घटते, सम्भवति)

बन्धने → √बन्ध् + ल्युट् तस्मिन् ।

विपदाग्रस्तस्य जनस्य हितकर: (हितैषिण:) जन: अपि विपत्ते: कारणं भवति यतो हि वृषभवत्सस्य गोदोहनकाले तस्य मातु: (धेनो:) जङ्घा अवरोधक: इव भवति । कथितमस्ति यत् [illegible] अग्निना दह्यमानस्य गृहस्य शमने वायु: अपकारक: भवति न तु उपकारक: । अत्र 'काव्यलिङ्गम्' अलङ्कार: । तल्लक्षणम् - "काव्यलिङ्गं हेतोर्वाक्यपदार्थता ।"

18-12-2020

डॉ॰ निर्मल कुमार झा, स॰ प्राचार्य ।
रा॰ उ॰ सं॰ महावि॰ सुखसेना, पूर्णियाँ ।